संस्कृत

ग्रं. २५

स्तोत्र-

शिवानंदलहरी (व्यापीक)

५८ । श्लो. १५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)



"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai"

शि॰ल॰
१

(२)

श्रीगणेशायनमः॥समस्तसुमनस्तोमसमस्तकन्यस्तपादुकं॥अस्तुनःस्वस्तिदंव
स्तुहस्तिवक्त्रसमाकृति॥१॥दुह्रान्वयमुखेनैवव्यक्तंव्याख्यायतेधुना॥शिवानंदल
हर्यैषासुखेनार्थःप्रतीयते॥२॥प्रारिप्सितस्यग्रंथस्यनिर्विघ्नपरिसमाप्त्यर्थंकृतमिष्टदेवता
प्रणामात्मकंमंगलंकविर्ग्रंथतोनिबध्नाति। कलाभ्यामिति।कलाभ्यांकलास्वरूपाभ्यां
चूडालंकृतशशिकलाभ्यां।चूडायांशिखायांअलंकृतापरिष्कृताशशिकलाचंद्रकलाय

कलाभ्यांचूडालंकृतशशिकलाभ्यांनिजतपः फलाभ्यांभक्तेषुप्रक
टितफलाभ्यांभवतुमेशिवाभ्यामस्तोकत्रिभुवनशिवाभ्यांहृदि
पुनर्भवाभ्यामानंदस्फुरदनुभवाभ्यांनतिरियम् १ ॥ ७ ॥

योरस्ताभ्यां निजतपःफलाभ्यां निजस्यस्वकीयस्यतपसः फलाभ्यांफलभूताभ्यांभक्तेषु भ
क्तिमत्सुविषयेषुप्रकटितफलाभ्यांप्रकटितानिप्रकाशितानिफलानिधर्मार्थकाममोक्षरूपा
णियाभ्यांतौतथोक्तौताभ्यांभवाभ्यांभवत्साभ्यांप्रपंचइतिभुवौसुरूपौवाताभ्यांआनंदस्फुरद
नुभवाभ्यांआनंदेस्फुरन्प्रकाशम[illegible]बोययोर्वोताभ्यां अस्तोकत्रिभुवनशिवाभ्या त्र
याणां[illegible]नांसमाहारस्त्रिभुवनं[illegible]नानिश्रेयांसिअस्तोका[illegible]तित्रिभुवनः

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

शिवानियाभ्यां तौ तथोक्तौ ताभ्यां शिवाच्च शिवश्च शिवौ ताभ्यामिति ताद‍र्थ्ये चतुर्थी पुनः शश्वत्
इयं नतिः प्रणामः मे मम हृदि हृदये भवतु अस्तु भू सत्तायामिति धातोर्लोट् अस्मिन् ग्रंथे प्रायशः
शिखरिणीवृत्तानि १॥ गलंतीति हे शंभो त्वच्चरितसरितः तव चरितं त्वच्चरितं तदेव सरित नदी
तस्याः सकाशात् गलंती स्रवंती किल्बिषं कल्मषमेव रजः पांसुः तं दलंती परिहरंती धियो

गलंती शंभो त्वच्चरितसरितः किल्बिषरजो दलंती धीकुल्यासरणि
षु पतंती विजयतां दिशंती संसारभ्रमणपरितापोपशमनं वसं
ती मच्चेतोहृदभुवि शिवानंदलहरी २ ॥ छ ॥ छ ॥

बुद्ध एव कुल्याः कृत्रिमसरितः तासां सराणिषु पतन्ती व्रजन्ती संसारभ्रमणं भ्रांतिरेव भ्रम
णं संचारस्तेन यः परिताप स्तस्य उपशमनं शांतिं दिशंती ददंती मम चेतः अंतःकर
णं तदेव हृद्भूः हृदाधारदेशः तस्यां वसंती वर्त्तमाना शिवानंदस्य लहरी प्रवाहरू शि॰ २॥
पाकृति विजयतां सर्वोत्कर्षेण वर्त्ततां जी जये इति धातोर्लोट् विपराभ्यां जेरित्यात्मनेपद

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शि:ल: त्रयीतित्रय्यावेदत्रयेणवेद्यंज्ञेयंसैषामृक्सामयजुषीइतिवेदास्त्रयस्त्रयीत्यमरः हृद्यंहृद

२ यंगमंत्रिपुरंअसुरपुरत्रयंस्थूलसूक्ष्मकारणाख्यशरीरत्रयंवाहरतीतित्रिपुरः तंआद्यंपुरा

(3) णपुरुषंत्रीणिनयनानिनेत्राणियस्यत्रिनयनः तंजटाभारेणउदारंमहांतंउदारोदातृ

महतोरित्यमरः चलन्उरगःसर्पहारःकंठाभरणंयस्यसः चलदुरगहारःतंधरतीतिधरः

त्रयीवेद्यंहृद्यंत्रिपुरहरमाद्यंत्रिनयनंजटाभारोदारंच

लदुरगहारंमृगधरं महादेवंदेवंमयिसदयभावंपशु

पतिंचिदालंबंसांबंशिवमतिविडंबंहृदिभजे ३ ॥

मृगस्यधरःमृगधरस्तंमहानुत्कृष्टोदेवस्तंदिव्यतिप्रकाशतेइतिदेवः तंमयिविषयेसद

यःदयासहितःभावःआशयोयस्यसःदयभावः तंपशवोब्रह्मादयस्तेषांपतिःपशुपतिःतं

चितोज्ञानस्यआलंबःआस्पदंचिदालंबःपार्वत्यासहितःसांबःतंअतिक्रांतोविडंबःअनु

कारिवस्तुअतिविडंबःअनुपमइत्यर्थः तंशिवंमहेशंहृदिमनसिभजे भजसेवायामितिधा २

॥ तोर्लर ३ ॥

" Joint project of the Rajwade Sanshodhan Mandal and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)

सहस्रेति शिवजगति लोके क्षुद्राणि निकृष्टानि फलानि धर्मार्थकामरूपाणि ददतीति दिशं
ति क्षुद्रफलदाः सहस्रं सहस्रसंख्याकाः विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययो
रित्यमरः विबुधाः देवाः वर्त्तन्ते विद्यन्ते वृतुवर्त्तने इति धातोर्लट् तदनुसरणं तेषां देवा
नां अनुसरणं अनुवर्त्तनं तत्कृतफलं तैः देवैः कृतं वितीर्णफलं प्रयोजनं वा अह

सहस्रं वर्त्तन्ते जगति विबुधाः क्षुद्रफलदा नमन्ये स्वप्ने वा तदनुस
रणं तत्कृतफलं हरिब्रह्मादीनामपि निकटभाजामसुलभं चिरं
याचे शंभो शिव तव पदांभोजभजनम् ४॥ २ ॥ ७ ॥

मिति शेषः स्वप्ने स्वप्नेपि न मन्ये मन अवबोधने इति धातोर्लट् शंभो निकटभा
जां हरिब्रह्मादीनां हरिश्च ब्रह्मा च हरिब्रह्माणौ तौ देवौ आदिर्येषां तेषामपि
असुलभं अप्राप्यं तव पादांभोजयोः पादारविंदयोर्भजनं सेवां चिरं बहुकालं अ
हमिति शेषः याचे याच्‌ याच्ञायामिति धातोर्लट् ४ ॥ ६ ॥ ७ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

शि.ल. श्रुतावित्ति श्रुतौवेदे धर्मशास्त्रे तर्के व्याकरणादौ वैद्ये भैषज्येशकुनकवितागान
३ भणितौ शकुनस्यप्रश्नशास्त्रस्यकविता गानस्यभणितौ वचनेपुराणेमंत्रेच्च मं
त्रशास्त्रेस्तुतिंस्तोत्रं नटनंनाट्यं हास्यंपरिहासस्तेषुवा अहम चतुरः असमर्थः रा
ज्ञांनृपाणांमयिप्रीतिःकथंभवति अहं अहंकः कियानित्यर्थः पशुपते प्रथित प्रसि

श्रुतौशास्त्रेवैद्येशकुनकवितागानभणितौ पुराणेमंत्रेवास्तु
तिनटनहास्येष्वचतुरः कथंराज्ञांप्रीतिर्भवतिमयिकोहंपशु
पते पशुंमांसर्वज्ञप्रथितकृपयापालयविभो ५॥ ७ ॥

द्ध सर्वज्ञ हे विभो त्वंपशुम् पशुप्रायम् मां कृपया दयया पालय रक्षपाल
रक्षण इति धातोर्लेट् पशु पतेः पशु पालन मुचितमिति भावः ५ ॥ ५

७ ७ ७ ७ ७ ७ ३

Project of the Rajawade Sanshodhan Mandal ... the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

घटइति सुधीः हेसुमते घटोवा मृत्पिंडोवा अणुरपि च परमाणुरपि वा धूमो वा अग्निर्वा अचलःपर्वतोवा पटोवा तंतुर्वा घोरशमनं घोरभयं कृतशमनोयमः तंपरिहरति निवारयति किं हृञ् हरणइतिधातोर्लट् उक्तपदार्थेषुकोपि यमबाधापरिहारक्षमोनभवतीतिभावः तर्कवचसा तर्कवाक्यैः कंठक्षोभं कं

घटोवामृत्पिंडोप्यणुरपिच धूमोग्निरचलः पटोवातंतुर्वाप
रिहरतिकिंघोरशमनं वृथाकंठक्षोभंवहसिनरसातर्कव
चसा पदांभोजेशंभोर्भजपरमसौख्यंव्रजसुधीः ६ ॥ ६ ॥

ठशोषं वृथा व्यर्थंवहसि प्राप्नोषि वहप्रापणइतिधातोर्लट् तरसाशीघ्रेणशंभोः परमेश्वरस्यपादांभोजंपादारविंदंभज श्रयस्व भजसेवायांधातोर्लट् परमसौख्यं उत्कृष्टसौख्यं मोक्षरूपंव्रजप्राप्नुहि व्रजगताविति धातोर्लोट् परंशिवपादारविन्दपरिचरणमेकपरमसुखकारणमिति भावः ६ ॥ ७ ॥ ७ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

शि॰स॰ ४ (5)

मनइति परमसर्वोत्कृष्टशिवतेपादाब्जेचरणकमलेममेतिशेषः मनः हृदयंनि
वसति वसनिवासइतिधातोर्लट् वचः वरक्स्तोत्रभणितौ स्तुतिवर्णनेनिवस
तिकरः हस्तश्चपूजायां अर्चायांवसतिश्रुतिः श्रोत्रमपिकथाकर्णनं चरित्रश्र
वणमेवविधिर्व्यापारः तस्मिन्निवसतितवध्याने चिंतनेबुद्धिरंतःकरणाव

मनस्तेपादाब्जेनिवसतिवचस्तोत्रभणितौ करश्चाभ्यर्चा
यांश्रुतिरपिकथाकर्णनविधौ तवध्यानेबुद्धिर्नयनयुगलं
मूर्त्तिविभवे परग्रंथान्कैर्वापरमशिवजानेबहुमतान् ७ ॥

स्थाविशेषः निवसति मूर्त्तौ विग्रहस्य विभवे वैभवे नयनं युगलं नेत्रद्व
यं निवसति कैर्वा करणैः परेषामशैवानां मतान् संमतान् परग्रंथान् रा
मानुजादि ग्रंथान् अहं जाने नजाने ज्ञा अवबोधने इति धातो र्ल
ट् ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ६

(5A)

यथेति हेपशुपतेयथायेनप्रकारेणशुक्तौ शुक्तिकायांरजतमितिबुद्धिर्भवति यथा काचाश्मनि काचोपलेमणिः रत्नमिति बुद्धिर्ज्ञानंभवति यथा पैष्टे पैष्टसंबंधिनि जलेक्षीरमितिबुद्धिर्भवति यथा मृगतृष्णासु मरु मरीचिषु मृगतृष्णामरीचिके

॥यथाबुद्धिःशुक्तौरजतमितिकाचाश्मनिमणि र्जलेपैष्टेक्षी
रंभवतिमृगतृष्णासुसलिलं तथादेवभ्रांत्याभजतिभजद
न्यंजडजनो महादेवंतंत्वा मनसिचनमत्वापशुपते ८॥

त्यमरः सलिलं जलमिति बुद्धिर्भवति यथा जडजनः अज्ञानी जनः॥ त्वां तं प्रसिद्धम् महादेवं देवता सार्वभौमम् मनसि च हृदयेपि नमत्वा अनत्वा भवदन्यं देव भ्रांत्या देव बुध्या भजति॥ स्तोत्रे त्वदुक्त्या येच धन्या इति भावः ८ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

शि॰ल॰ इह जगति जनः जडधिया मंदबुद्ध्या कुसुमार्थं पुष्पहरणार्थं गभीरे अगाधे कासारे
५ सरसि विशति प्रविशति विश प्रवेशने इति धातोर्लट् विजने जन विरहिते घोरं
(६) भयंकरं विपिनं अरण्यम् तस्मिन् विशाले विस्तारवति शैले वर्त्तते च॥ भ्रम

गभीरेकासारेविशतिविजनेघोरविपिने विशालेशैलेचभ्रमः
तिकुसुमार्थंजडधिया समर्प्यैकंचेतःसरसिजमुमानाथभव
ते सुखेनैवस्थातुंजनइहनजानातिकिमहो ९ ॥ ९ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ति संचरति॥ भ्रमु चलनं इति धातो लेट्॥ उमा नाथ भवते तुभ्यं एकं चे
तः॥ मन एव सरसिजं कमलं समर्प्य॥ अर्पयित्वा सुखेन नैव स्थातुं किं कि
मर्थं जानाति ज्ञा अव बोधने इति धातो लेट्॥ अहो इति विषादे ९॥
५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ५

(6A)

नरत्वेति ननुपशुपतिइहजगति नरत्व मनुष्यत्वं देवत्वं देवतात्वं वनमृगत्वं मशक
त्वं पशुत्वं कीटत्वं विहगादिनानापक्षित्वादिरूपेण जननं जन्मभवनं नः हृदयं मव
सदा निरंतरं त्वत्पादाब्जस्मरण परमानंद लहरी तवपादाब्जस्य चरणारविंदस्य
स्मरणेनध्यानेनयःपरमउत्कृष्टज्ञानानंदस्तस्यलहरी प्रवाहेविहारेक्रीडने आसक्तं भवति

नरत्वंदेवत्वंननुवनमृगत्वंमशकतापशुत्वंकीटत्वंभवतुविहगत्वा
दिजननं सदात्वत्पादाब्जस्मरणपरमानंदलहरी विहारासक्तंचेद्धृद
यमिहकिंतेनवपुषा १० वटुर्वागेहीवायतिरपिजटीवातदितरो न
रोवायःकश्चिद्भवतुभवकिंतेनभवति यदीयंहृत्पद्मंयदिभवदधी
नंपशुपते तदीयस्त्वंशंभोभवसिभवभारंचवहसे ११ ॥ ७ ॥

चत्तेन वपुषानरदेवपशुकीटादिशरीरेणकिंत्वद्भजनहीनं देवताशरीरमपि व्यर्थइति
भावः १० वटुरिति हेभवपरमेश्वरवटुर्ब्रह्मचारीवागृहीगृहस्थोवायतिःसन्यास्यपिवा ज
टीवानप्रस्थोवातेभ्यः इतरःतदितरःबद्धादिव्यतिरिक्तःयःकश्चिन्नरोवाभवतु तेनब्रह्मचर्या

शि: ल० ६ (७)

दिनाकिंभवति नकिमपीत्यर्थः पशुपते शंभोयदीयं यत्पुरुषसंबंधहृत्पद्मं हृदयकम
लं भवदधीनं यदित्थं हृशं चेत् त्वं तदीयः तदधीनः भवसि तस्य भवसारं संसारसारंव
हसे दधासि वहप्रापण इतिधातोर्लट् ११ गुहायामिति शंभोगुहायांगह्वरेवा देवखातबि
लेगुहागह्वरमित्यमरः गेहेगृहेवा बहिरपिबहिःप्रदेशेवा वनेअरण्येवा अद्रिशिखरेपर्वतशृंगे
वाजलेउदकमध्येवा वन्हौअग्निमध्येवा जनइतिशेषः वसतुवर्त्ततां वसतेःनिवासस्यफलंत्र

**गुहायांगेहेवाबहिरपिवनेवाद्रिशिखरे जलेवावन्हौवावसतुवसतेः**
**किंवदफलं॥यदीयंस्वच्छान्तःकरणमपिशंभोतवपदे स्थितंचेद्योगो**
**सौसचपरमयोगीसचसुखी १२ ॥ ६ ॥ ६ ॥ ६ ॥**

योजनंकिं तत्वंवद ब्रूहि वदव्यक्तायांवाचीतिधातोर्लट् यदीयंयत्संबंधि स्वच्छंनिर्मलमंतः
करणं अंतरंगमपि तवपादेचरणेस्थिरंआसक्तंचेत् असौ त्वच्चरणसद्भिरेवयोगः अष्टां
गयोगः सत्पुरुषः परमयोगी योगीश्वरीभवति सः पुरुषः सुखीच सुखातिशयव
वानपि भवति ॥ १२ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६

(7A)

अपारेति हेपशुपते निजभजनस्यसेवायाःदूरेदूरभूतेअनंतसंसारेसंसृतौ व्यर्थंवृथा
भ्रमंतंभ्रमणंकुर्वाणं मांकृपयाअत्यंतकृपयापातुंरक्षितुं उचितं युक्तं औचित्यमेव व
दृश्णोमि मदन्यइत्यादिना त्रयाणांजगतांसमाहारस्त्रिजगत् तस्मिन्मदन्यःमद्व्यति
रिक्तःदीनःकृपणःतवकः अस्ति कृपणानांदीनानांरक्षासुपालनेषुसमर्थ त्वदन्यःभवद्व्य

अपारेसंसारेनिजभजनदूरेजडतया भ्रमंतंमांव्यर्थंपरमकृपयापातुमुचि
तं मदन्यःकोदीनस्तवकृपणरक्षासुनिपुण स्त्वदन्यःकोवामेत्रिजग
तिशरण्यःपशुपते १३ प्रभोत्वंदीनानांखलुपरमबंधुःपशुपते प्रमु
ख्योहंतेषामपिकिमुतबंधुत्वमनयोः त्वयैवक्षंतव्याःशिवमदपरा
धाश्चसकलाः प्रयत्नात्कर्त्तव्यंमदवनमियंबंधुसरणिः १४ ॥ ० ॥

तिरिक्तःशरणेरक्षणेसाधुः शरण्यायमेवदयोस्ति अहमेवदीनः त्वमेवरक्षकः अतोम
द्रक्षणंतवयुक्तं अनन्यगतिकत्वादितिभावः १३ प्रभावितिप्रभोपशुपते त्वंदीनानां
कृपणानांपरमश्रेष्ठःबंधुःसखाभवसि अहंतेषांदीनानामपिमध्येप्रमुख्यःश्रेष्ठःभ
वामिखलु अनयोरावयोःबंधुत्वंकिमुतकिंवक्तव्यमित्यर्थः शिवसकलाःसर्वेमम

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

शि॰नं॰ल॰ अपराधाः त्वया संतव्याः सोढव्या एव प्रयत्नात् मदवनं मद्रक्षणं त्वया कर्त्तव्यमेव इयं अप

७ राधसहनादिर्बंधुसरणिः बंधुरीतिर्भवति १४ उपेक्षेति भवं संसारं हरतीति भवसंसार

हरः भवेति हरेति च व्यस्त संबोधनं वा पशुपते उपेक्षा औदासीन्यं नो चेत् न भवति यदि

(8) वतस्त्वं ध्यानमुखां पराङ्मुखां दुराशाया दुरभिलाषेण भूयिष्ठां प्रबलां विधेः ब्रह्मसंबं

धिनीलिपिः अक्षरन्यासः तां त्वं किं कस्मात् न हरसि अशक्त इति अशक्तो यदि असमर्थश्चे

उपेक्षानोचेत्किंनहरसिभवध्यानविमुखां दुराशाभूयिष्ठांविधि

लिपिमशक्तोयदिभवान् शिरस्तद्वैधात्रंभवहरसुवृत्तंपशुपते

कथंवानिर्यत्नात्करमुखमुखेनैवलुलितम् १५॥ ७ ॥

त् सुवृत्तं सम्यग्वर्तुलं वैधात्रं ब्रह्मसंबंधि तत्प्रसिद्धं ब्रह्मशिरः निर्यत्नात् अनायासात्

त्वया करनखमुखेन करस्य हस्तस्य नखमुखेनैव नखाग्रमात्रेण कथं वा लुलितं

छिन्नं ब्रह्मशिरश्छेदन समर्थस्य तल्लिपि हरणे सामर्थ्ये किं वक्तव्यमिति भावः

१५ ॥ १ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ १७

(8A)

विरंचीति हेभव विरंचिर्विधिः यस्यदीर्घमायुः आयुष्यं सदीर्घायुः भवतु भवतात्‌ तया तद्धूरशिरश्चतुष्कं तस्य ब्रह्मणः वराणां श्रेष्ठानां शिरसां चतुष्टयं संरक्ष्यं रक्षणीयं सः विधिः दैन्यं कार्पण्यं लिखितवान्‌ लेखनं कृतवान्‌ खलु तथापि मे मम को विचारः न कापि चिंतेत्यर्थः शिवः अखिलदीनावनपरः अखिलदीनानां सर्वकृ

विरंचिर्दीर्घायुर्भवतुभवतात्तद्धूरशिरश्चतुष्कं संरक्ष्यं स खलु भ
वद्दैन्यं लिखितवान्‌ विचारः को वा मे विशदकृपयापातु शिव·
ते कटाक्षव्यापारः स्वयमखिलदीनावनपरः १६ ॥ ७ ॥

पणानां अवनं रक्षणमेव परं प्रधानं यस्य सः तथोक्तः ते तव कटाक्षव्यापारः नेत्रांत विलोकनं स्वयं विशुद्ध्या अकृत्रिमयेत्यर्थः कृपया दयया मां पातु रक्षत्विति पा रक्षण इतिधातोर्लेट्‌ पुरहर करुणा पात्रस्य न चतुर्मुखरार्य लिखितावश्यं भाव शंकापीति भावः १६ ॥ ७ ॥ ७ ॥

शि.म.ल. ९ फलादिति हेविभो स्वामिन् देवपुण्यानांसुकृतानां फलात् परिपाकाद्वा करु
णया त्वयि कृपया त्वयि मम प्रसन्ने प्रसादवति सत्यपि भवद्मलपादाम्बु
जयुगलं युग्मं तदा पश्येयं विलोकयेयं दृशिप्रेक्षिणइतिधातोः संभावना

(9)

फलाद्वापुण्यानांममकरुणयावात्वयिविभो प्रसन्नेपिस्वामिन्
भवद्मलपादाब्जयुगलं तदापश्येयंमांस्थगयतिपुनःसंभ्र
मजुषां निलिंपानांश्रेणीनिजकनकमाणिक्यमुकुटैः १७ ॥

यांलिङ् पुनः मुहुः संभ्रमं त्वरां जुषंते प्राप्नुवन्तीति संभ्रमजुषः तेषां निलिं
पानां सुराणां श्रेणीः सुमुकुटैः सुवर्ण रत्नमय किरीटैः मां कदा स्थगयति
आछादयति स्थग आछादन इति धातोर्लट् १७ ॥ छ ॥ छ ॥ ९

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the "

त्वमिति शिव त्वं एकः एक एव लोकानां जनानां परमं उत्कृष्टं फलं ददातीति परम
फलदः तन्मूलां त्वमेव मूलं निदानं यस्यास्तां दिव्यपदवीं उत्कृष्टपदवीं उत्कृष्टं संप
दं वहंतः प्राप्ता अपि हरिर्विष्णुमुखं प्रधानं येषां ते तथा पुनः मुहुः मुहुः त्वां भजंते
सेवंते उत्कृष्टफलप्राप्तावपि तेषामाशा न विच्छेतेति भावः तव दाक्षिण्यं चौदा

(9A)

त्वमेको लोकानां परमफलदो दिव्यपदवीं वहंतस्त्वन्मूलां पु
नरपि भजंते हरिमुखाः कियद्वा दाक्षिण्यं शिव तव मदाशा
च कियती कदा वा मद्रक्षां वहसि करुणापूरितदृशा १८

र्यं कियद्भूम अपरिमितमेवेत्यर्थः दक्षिणः सरलोदार इत्यमरः मम आशा मदाशा
मदभिलाषश्च कियान तिस्वल्प इत्यर्थः ॥ करुणापूरितया कृपा पूर्णया दृशा
दृष्ट्या त्वं मद्रक्षां मत्परिपालनं कदा वा वहसी करोषीत्यर्थः १८ ॥ ७ ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the

शि॰नं॰ दुराशेति दुराशाभूयिष्टे दुरभिलाषजलक्षिते दुराधिपानांदुष्टप्रभूनां गृहद्वारेषुघ
९ टयनिगमयतीतिदुरधिपगृहद्वारघटकः तस्मिन्दुरितनिलयेसकलदुष्कृता
स्पदे अतएव दुःखजनकेदुरंते अपारसंसारेमदायासं मत्श्रमत्वं किंकस्मात्त्न
व्यपनयसे नपरिहरसि नइतिप्रापणइतिधातोर्लेट् वद ब्रूहि अयं मदाया
(10)

दुराशाभूयिष्टेदुरधिपगृहद्वारघटके दुरंतेसंसारेदुरितनिलये
दुःखजनके मदायासंकिंनव्यपनयसिकस्योपकृतये वदे
यंप्रीतिश्चेत्तवशिवकृतार्थाःखलुवयं १९ ॥ ७ ॥

सः कस्य उपकृतये उपकाराय भवति नकस्यापीति भावः तवप्रीतिः भ
वतिचेत् वयं कृतार्थाः धन्याः सकलानिवृत्तिर्भवतीति भावः १९ ॥
७ ७ ७ ७ ७ ७ ॥ ९

सद्वेति असाविति शेषः असौ हृदयकपिः सदा निरंतरं मोहाद्वैचित्यमेव अ
टविः अरण्यं तस्यां महाटव्यां चरति संचरति चरगतिरक्षणयोरितिधातोर्ले
ट् आशा तृष्णा ता एव शाखाः तासु आशासु अटति संचरति अटगताविति धा

(10A)

सदा मोहाटव्यां चरति युवतीनां कुचगिरौ नटत्याशा
शाखास्वटति चरति स्वैरमभितः कपालिन् भिक्षो मे हृदय
कपिमत्यंतचपलं दृढं भक्त्या बध्वा शिव भवदधीनं
कुरु विभो २० ॥ ॥ ॥ ॥

तोर्लट् अभितः सर्वतः स्वैरं स्वच्छंदं यथा भवति तथा चरति कपालिन् कपालधा
रिन् भिक्षो शिव हे विभो अत्यंतचपलं मे मम हृदयमेव कपिः तं त्वं भक्त्या दृढं
बध्वा भवदधीनं त्वदृशं कुरु डुकृञ् करण इति धातोर्लट् २० ॥ ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the "

शि.नं.ल. धृतिरिति गुणैःप्रथमैः सेवितःविभोस्मरारेमन्मथरिपोस्वामिन्धृतिःधैर्यमेवस्तंभः
१० स्थूणासएवाधारोअवलंबोयस्यास्तांधृतिस्तंभाधारां दृढैःगुणैःशमदमादिभिः
रज्जुभिश्चनिबद्धांसगगनां अंतराकाशवतीं विचित्रांनानावर्णांआश्चर्यकारिणीं
चपद्माढ्यां पद्मेनपुंडरीकेणआढ्यां अन्यच्च पद्मया लक्ष्म्या आढ्यांसमृद्धांअ

(11)

धृतिस्तंभाधारां दृढगुणनिबद्धांसगगनां विचित्रांपद्माढ्यांप्रति
दिवससन्मार्गघटिताम् स्मरारेमच्चेतःस्फुटपटकुटींप्राप्यवि
शदां जयस्वामिन्शक्त्यासहशिवगणैःसेवितविभो २१॥ ॥

थवापद्मैःकमलाकाररचनाविशेषैः आढ्यांप्रतिदिवसांदिने दिने सन्मार्गे
ण सदाचारेण घटितां युक्तां अन्यत्रसन्मार्गे सुवर्त्मनि घटितां निर्मितां विश
दां स्वच्छां मच्चेतः स्फुटपटकुटीं ममचेतः मनएव स्फुटाव्यक्ता पटकुटींवस्त्र
विश्रमतांशक्त्याशिवयासहत्वंप्राप्यजयसर्वोत्कर्षेणवर्तस्वजिजयइतिधातोर्लट् २१ १०

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com